**हीराङ्ग** पु० हीरमिव दृढमङ्गमस्य । इन्द्रस्य वज्रे शब्दमा० ।

**हील** न० ही-विस्मयं लाति ला-क । शुक्रे धातौ रेतसि ।

**हीलुक** न० हिल-उक पृषो० । गौड़ीमद्ये शब्दच० ।

**हीही** अव्य० ही+द्वित्वम् । १विस्मये २हास्ये च मेदि० ।

**हु** होमे अदने च जु० प०सक० अनिट् । जुहोति अहौषीत् जुहाव । प्रीणने च । "जुहुधीह पावकम्" किरा० ।

**हु(हू)ङ्कार** पु० हु(हू)मित्यव्यक्तशब्दस्य कारः कृ-घञ् । हुमित्यव्यक्तस्य प्रतिषेधसूचकशब्दस्योच्चारणे । "मौनव्रतं महाकष्टं हु(हू)ङ्कारेणापि नश्यति" इति पुराणम् दीर्घमध्योऽपि ।

**हुड** राशीकरणे सक० मज्जने संघाते च अक० तु० कु० प० सेट् । हुडति अहुडीत् जुहोड ऋदित् चङि न ह्रस्वः ।

**हुड** राशीकरणे भ्वा० आ० सक० सेट् इदित् । हुण्डते अहुण्डिष्ट । [होडते अहोडिष्ट ।

**हुड** गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः

**हुड** पु० हुड-क । १मेषे हेमच० । चौरनिवारणार्थं भूमौ निखाते २लौहकीलके च ३सैनाश्रयस्थाने ४रथोपरि विण्मूत्रत्यागार्थस्थानघट्टके च "पुरी समन्ताद्विहिता सपताका सतोरणा । सचक्रा सहुडा चैव सयन्त्रखनका तथा" भा० व० १५ अ० । "चक्राणि योधगणाः हुडा-स्तदाश्रमस्थानानि भाषायां (वुरुज)संज्ञानि । अन्ये तु विण्मूत्रोत्सर्जनस्थानघट्टकाणि हुडा इत्याहुः । अट्टा-हरानि च । "कल्पग्रन्ते हुडघट्टकानि रथस्योपरि सूरि-भिः विण्मूत्रस्पर्शशुद्ध्यर्थकरादिस्पर्शं उद्यतः इति" नीलक०

**हुडुक्क** पु०कु०हुड़-बा०उक्क । १वाद्यभेदे २दात्यूहखगे ३मद-मत्ते मेदि० (हुडुक) इति ख्याते ४कपाटदण्डे शब्दर० ।

**हुडुत्** न०कु०हुड-उति । १वृषशब्दे २अव्यक्ते शब्दे काशीख० ।

**हुडुम्ब** पु० कु० हुड-उम्ब । भ्रष्टचिपिटे शब्दमा० ।

**हुण्ड** पुंस्त्री०हुडि-अच् । १व्याघ्रे २ग्राम्यसूकरे ३राक्षसे च स्त्रियां ङीष् । ४मूर्खे त्रि० । [अमरः । भावे क्त । २होमे न०

**हुत** त्रि० हु-क्त । देवोद्देशेन मन्त्रद्वाराऽग्नौ प्रक्षिप्ते घृतादौ

**हुतभुज्** पु० हुतं मन्त्रेण प्रक्षिप्तं घृतादि भुङ्क्ते भुज-क्विप् । १अग्नौ २चित्रकवृक्षे च अमरः ।

**हुतवह** पु० हुतं घृतादिकं वहति प्रापयति देवान् प्रीत्यर्थम् वह-अच् । १अग्नौ हेमच० २चित्रकवृक्षे च अमरः ।

**हुताश** पु० हुतमश्नाति अश-अण् । १वह्नौ शब्दर० २चित्रकवृक्षे च । ल्युट् हुताशनोऽप्युभयत्र । स च कर्मविशेषविहितवह्नौ च । "कोटिहोमे हुताशनः" ति० त० ।

**हुताशनी** स्त्री हुताशनस्तद्दीपनमस्त्यस्याम् अच् गौ० ङीष् । फाल्गुनपूर्णिमायां होलाकाशब्दे दृश्यम् ।

**हुम्** अव्य० हु-डुमि । १स्मरणे २प्रश्ने ३अनुज्ञायां च ४निवारणे मेदि० । "गुरुं हुङ्कृत्य तुङ्कृत्येति" स्मृतिः ।

**हुर्च्छ** कौटिल्ये भ्वा० प० सक० सेट् । हूर्च्छति अहूर्च्छीत् हुस्वपाठवशात् क्विपि छलोपे हूः हुरौ हुर इत्यादि ।

**हुल** हृतौ संवरणे च भ्वा० प० सक० सेट् । होलति अहोलीत् ज्वला० हुलः होलः ।

**हुलहुली** स्त्री हुल-क आभीक्ष्ण्ये द्वित्वम् गौरा० ङीष् । स्त्रीणां मङ्गलध्वनिभेदे (उलुउलु) । त्रिका० ।

**हुहु(हू)** ह्वे-डु नि० । गन्धर्वभेदे पृषो० हूहूरित्यप्यत्र ।

**हूङ्कार** पु० हुम्+कृ-घञ् । अवज्ञाहेतुके शब्दभेदे "हूङ्कारेणैव तं भस्म सा चकाराम्बिका ततः" देवीमा० ।

**हूड** गतौ भ्वा० आ० सक०सेट् ऋदित् चङि न ह्रस्वः । हूडते अहूडिष्ट ।

**हूत** त्रि० ह्वे-क्त संप्रसारणम् । आहूते कृताह्वाने ।

**हूति** स्त्री ह्वे-क्तिन् संप्रसारणम् । आह्वाने अमरः ।

**हूण** पु० ह्वे-नक सम्प्रसारणं च । १म्लेच्छजातिभेदे २तद्वासस्थानभेदे च "हूणवङ्गखसेष्वेव नान्यदेशे कदाचन" ज्यो० । ३तत्र प्रचलिते स्वर्णमुद्राभेदे इत्यन्ये । "श्वपाकस्तु तुरुष्कस्तु हूणो यवन इत्यपि । लोकबाह्यस्तु यो वाजिगवाश्याचारवर्जितः । म्लेच्छः किरात शबर पुलिन्दाद्यास्तु तद्भिदा" जटाध० ।

**हूम्** अव्य० हु-बा०डूमि । १प्रश्ने २वितर्के अमरः ३सम्मतौ ४क्रोधे ५भये निन्दायाम् अवज्ञायाञ्च चक्रवर्त्ती ।

**हूर्च्छन** न० हुर्छ-ल्युट् । कौटिल्ये । [ङीष् ।

**हूरव** पुंस्त्री० हू इति रवो यस्य । शृगाले हेमच० स्त्रियां

**हूहु(हू)** पु० गन्धर्वविशेषे शब्दर० ।

**हृ** हरणे भ्वा०उ०द्वि०अनिट् । हरति ते अहार्षीत् अहृत जहार जह्रे हरिष्यति ते । सस्ये कर्मणि लकारादि । ह्रियते अहारि अहारिषाताम् अहृषाताम् जिहीर्षति ते

अनु+सदृशीकरणे आ० अनुहरते पैतृकमश्वः ।

अप+दूरीकरणे अपहरति अपसारयतीत्यर्थः चौर्य्ये च ।

अभि+आभिमुख्येन हरणे ।

सम्+अभि+पौनः पुन्येन सम्पादने ।

अभि+अव भोजने अभ्यवहरति भुङ्क्ते इत्यर्थः ।

सम्+अभि+वि+आ+नैकट्यसम्बन्धसम्पादने ।

अव+दूरीकरणे सैन्यावहारः ।